खड़्गी नादोऽन्तस्तं देवी कवचं वारुणीपतिः।
शिखा पाशी क्रिया माला भामिनी कामिनी प्रिया ॥
ज्वालिनी वेगिनी नादः प्रद्युम्नः शोषणो हरिः।
विश्वात्ममन्त्री वली चेतो मेरुगिरिः कला रसः॥"

इति नानातन्त्रशास्त्रम् ॥

(अनुबन्धविशेषः। यथा, कविकल्पद्रुमे। "दिवाद्यो द्युतादिकः।" एतेन अद् लौ भच्चि लुगद्भ्योऽपः। अस्ति इति ॥ छन्दःशास्त्रोक्तौ लघुसंज्ञको गणविशेषः। इति छन्दोमञ्जरी ॥)

लं, क्ली, (लीयतेऽनेनेति। ली + अभिधानान्नियपदेऽपि डः।) पृथ्वीवीजम्। इति तन्त्रम् ॥

लः, पुं, (लातीति। ला + अच्।) इन्द्रः। इति मेदिनी। ले, १ ॥

लक, क स्वादे आप्ने। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट्।) स्वादो रसोपादानम्। क, लाकयति मोदकं बालकः। इति दुर्गादासः॥

लकचः, पुं, लकुचवृक्षः। इति शब्दरत्नावली ॥

लकुचः, पुं, (लक्यते इति। लक स्वादे + बाहुलकादुचः।) वृक्षविशेषः। डेहुया इति मादार इति च भाषा। तत्पर्य्यायः। लिकुचः २ शालः ३ वनशाली ४ दृढ़वल्कलः ५ डहुः ६ कार्श्यः ७ शूरः ८ स्थूलस्कन्धः ९। अस्य गुणाः। तिक्तरसत्वम्। कषायत्वम्। उष्णत्वम्। लघुत्वम्। कण्ठदोषहरत्वम्। दाहित्वम्। मलसंग्रहदायकत्वञ्च। इति राजनिर्घण्टः। * । अपि च।

"लकुचः क्षुद्रपनसो लिकुचो डहुरित्यपि।
आमं लकुचमुष्णञ्च गुरु विष्टम्भकृत्तथा ॥
मधुरञ्च तथाम्लञ्च दोषत्रितयरक्तकृत्।
शुक्राग्निनाशनञ्चापि नेत्रयोरहितं स्मृतम् ॥
सुपक्वं तत्तु मधुरमम्लं वानिलपित्तहृत्।
कफवह्निकरं रुच्यं हृद्यं विष्टम्भकञ्च तत् ॥"

इति भावप्रकाशः ॥*॥

अन्यच्च।

"लकुचं गुरु विष्टम्भि स्वाद्वम्लं रक्तपित्तकम्।
श्लेष्मकारि समीरघ्नमुष्णं शुक्राग्निनाशनम् ॥"

इति वैद्यकम् ॥

लक्तकः, पुं, (रक्तेन रक्तवर्णेन कायतीति। कै + कः। रस्य लत्वम्।) अलक्तकः। इति शब्दरत्नावली ॥ (यथा, गो० रामायणे ।२।६०।२६।

"प्रज्ञया लक्तकरसप्रख्यौ तद्रसवर्ण्णितौ।
तथैव रंजतुल्याभरणौ पद्मवर्णौ ॥")

जीर्णवस्त्रखण्डकम्। नेकड़ा इति भाषा। तत्पर्य्यायः। कर्पटः २। इत्यमरः ॥ नक्तकः ३। इति भरतः ॥ हे मलिनत्वादिदुष्टजीर्णवस्त्रखण्डे नेकड़ा इति ख्याते। लक्तकाद्यष्टकं वस्त्रमात्रे इति केचित् ॥ पटोऽस्त्री कर्पटः शाटः सिचयप्रोतनक्तकाः। इति रभसः ॥ लक्यते हीनेरास्वाद्यते अनुभूयते लक्तः इक लक क स्वादे आप्ने चुभ्यो णिर्व्वेति विभाषितत्वात् न णिः कर्म्मणि क्तः ततः स्वार्थे कः लक्तकोऽन्तःस्थादिः। अज्यते स्म अक्तं व्यक्तं अनूणोः क्तः न अक्तं कं सुखं यस्मादिति त्रिपदबहुव्रीहौ मनीषादित्वात् अकारस्य पूर्व्वलोपे नक्तकस्तवर्गपञ्चमादिरपि। इति तट्टीकायां भरतः ॥

लक्तकर्म्मा, [न्] पुं, (लक्तं रक्तवर्णं करोतीति। कृ + मनिन्।) रक्तवर्णलोध्रः। इति शब्दचन्द्रिका ॥

लक्ष, क न दर्शने। अङ्के। इति कविकल्पद्रुमः ॥ (चुरा०-उभ०-सक०-सेट्।) क न, लक्षयति लक्षयते घटं लोकः। पश्यति चिह्नयुक्तं करोतीत्यर्थो वा। इति दुर्गादासः ॥

लक्षं, क्ली, (लक्षयतीति। लक्ष + अच्।) व्याजः। शरव्यम्। इति मेदिनी। षे, २३ ॥ (यथा, मनुः। ७। ५४।

"मौलान् शास्त्रविदः शूरान् लब्धलक्षान्
कुलोद्गतान्।
सचिवान् सप्त चाष्टौ वा प्रकुर्व्वीत परीक्षितान् ॥")

लक्षं, क्ली, स्त्री, (लक्षयतीति। लक्ष + अच्।) दशायुतसंख्या। इति मेदिनी। षे, २३ ॥ लाक इति भाषा। (यथा, कथासरित्सागरे ।४३।९०८।

"तस्यैकादशभिर्मित्रैः सहायातैर्युतस्य हि।
लक्षमभ्यधिकं देव वर्त्तते वरवाजिनाम् ॥")

लक्षकं, क्ली, (लक्षयतीति। लक्ष + ण्वुल्।) लक्षयति यत्। यथा। लक्षकं नाम लक्षयति।

"यादृशार्थस्य सम्बन्धवति शक्तन्तु यद्भवेत्।
तत्र तल्लक्षकं नाम तच्छक्तिविधुरं यदि ॥"

यादृशार्थसम्बन्धवति यन्नाम सङ्केतितं तदेव तादृशार्थे लक्षकं यदि तादृशार्थे शक्तिशून्यं भवेत्। सैन्धवादयस्तु शब्दाः तुरगादिसम्बन्धिनि लवणादाविव तुरगादावपि शक्ता एव। गङ्गादयस्तु तीरादावसङ्केतिताः तत्सम्बन्धितीरादिशक्तत्वेन गृहीता एव तीराद्यन्वयं बोधयन्ति तत्र लक्षका एव। अपि च। तदेवं विधलक्षणावत्त्वाल्लक्षकं नामापि जहत्स्वार्थादिभेदादनेकविधमित्यर्थः स्यादेतद्यदि तीरादिलक्षकतया गङ्गादिपदस्य ज्ञानं तीराद्यनुभवे भवेद्धेतुस्तदोक्तक्रमेण लक्षकाणां विभागो न त्वेतदस्ति। तीराद्यन्वयबोधं प्रति तीरादिशक्तत्वेनैव पदज्ञानस्य लाघवेन हेतुतया लक्षकाणामननुभावकत्वात् गुरूणामग्नौ शैत्यं स्पृशेदित्यादौ शब्देन दहनादिनेव गङ्गायां घोष इत्यादौ लक्षितेन तीरादिना साङ्केतगृहीतासंसर्गकस्यैव सप्तम्यर्थाधेयत्वान्वयबोधप्रविष्टत्वादिति चेन्न। प्रकृत्यर्थावच्छिन्नस्यैव प्रत्ययार्थस्य धर्म्मान्तरेऽन्वयबुद्धेर्व्युत्पन्नतया तीराद्यविशेषितस्य सुबर्थाधेयत्वादेर्घोषादावन्वयबोधायोगात्। न च शक्तस्यैव पदस्य स्वसाकाङ्क्षपदान्तरोपस्थाप्यार्थान्वितस्वार्थधर्म्मिकान्वयबोधं प्रति हेतुत्वादन्वयबुद्धौ लक्षार्थस्य प्रवेशः। कुन्ताः प्रविशन्तीत्यादौ लक्ष्यस्य कुन्तधरादेरन्वयविशेष्यत्वानुपपत्तेः। कुमतिः पशुरित्यादौ लक्षार्थयोर्म्मिथोऽन्वयबोधस्याप्यनुभविकत्वाच्च। तस्मात् शक्तेरिव भक्तेरपि ज्ञानमनुभावकं भवत्येव कार्य्यतावच्छेदकस्य सङ्कोचाच्च न व्यभिचारः। इति शब्दशक्तिप्रकाशिका ॥

लक्षणं, क्ली, (लक्ष्यतेऽनेनेति। लक्ष + ल्युट्। यद्वा, "लक्षेरट् च।" उणा० ३। ७। इति नप्रत्ययस्तस्याड़ागमश्च।) चिह्नम्। (यथा, रघुः। १०। ६।

"अथाचिरेण भविष्यन्त्याः कार्य्यसिद्धेर्हि लक्षणम् ॥")

नाम। इति मेदिनी। णे, ७५ ॥ लक्ष्यते ज्ञायतेऽनेनेति लक्षणम्। तद्द्विविधम्। इतरभेदानुमापकम्। व्यवहारप्रयोजकञ्च। इति न्यायमतम् ॥ व्याकरणमते तु।

"कृत्तद्धितसमासानामभिधानं नियामकम्।
लक्षणन्त्वभिज्ञानां तदभिज्ञानसूचकम् ॥"

इति वोपदेवः ॥

(लक्षणलक्षणन्तु। "समानासमानजातीयो व्यवच्छेदो लक्षणार्थः।" इति सांख्यतत्त्वकौमुद्याम् ।५॥ सुखदुःखलक्षणं यथा, मनौ ।४।१६०।

"सर्व्वं परवशं दुःखं सर्व्वमात्मवशं सुखम्।
एतद्विद्यात् समासेन लक्षणं सुखदुःखयोः ॥")

दर्शनम्। इति लक्षधात्वर्थदर्शनात् ॥

लक्षणः, पुं, (लक्ष + "लक्षेरट् च।" उणा० ३।७। इति नस्तस्याड़ागमश्च। लक्षणमस्त्यस्येति अच् वा।) सौमित्रिः। यथा, हरिवंशे। ४१ ।१६६।

"लक्षणानुगतो यत्र सर्व्वभूतहिते रतः।
चतुर्द्दश वने तप्त्वा तपो वर्षाणि राघवः ॥")

सारसपक्षी। इति शब्दरत्नावली ॥

लक्षणा, स्त्री, (लक्षण + टाप्।) सारसी। इति मेदिनी। णे, ७५ ॥ हंसी। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ (अप्सरोविशेषः। यथा, महाभारते। १। १२३। ५९।

"अम्बिका लक्षणा क्षेमा देवी रम्भा मनोरमा।")

शक्यसम्बन्धः। यथा,—

"लक्षणा शक्यसम्बन्धस्तात्पर्य्यानुपपत्तितः ॥"

इति भाषापरिच्छेदः ॥

गङ्गायां घोष इत्यादौ गङ्गापदस्य शक्यार्थे प्रवाहरूपे घोषस्यान्वयानुपपत्तिस्तात्पर्य्यानुपपत्तिर्व्वा यत्र प्रतिसन्धीयते तत्र लक्षणया तीरस्य बोधः। सा च शक्यसम्बन्धरूपा। तथा हि प्रवाहरूपशक्यार्थसम्बन्धस्य तीरे गृहीतत्वात्तीरस्य स्मरणं ततः शाब्दबोधः। इति सिद्धान्तमुक्तावली। * । अपि च।

"जहत्स्वार्थाजहत्स्वार्थानिरूढ़ाधुनिकादिकाः।
लक्षणा विविधास्ताभिर्लक्षकं स्यादनेकधा ॥"

काचिल्लक्षणा शक्यावृत्तिरूपेण बोधकतया जहत्स्वार्थेत्युच्यते। यथा तीरत्वादिना गङ्गादिपदस्य। काचिच्छक्यलक्ष्योभयवृत्तिना शक्य-